# संस्कृतवार्ता:

दिनाङ्क : 18/08/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- विपक्षस्य कोलाहलेन लोकसभा अद्य दिवसाय स्थिगितम्, अध्यक्षेण ओम बिरला वर्येण: अन्तरिक्ष यात्रिणं शुभांशु शुक्लं वर्धापितम्।
- अद्य संसदा भारतीय-पत्तन-विधेयकम् पञ्चविंशत्यधिक द्विसहस्रं राज्यसभायाः स्वीकरणानन्तरं पारितम्। विधेयकस्यास्य उद्देश्यं राज्य-सागरीय-मण्डलानां शक्तीकरणम् अस्ति।
- केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अवदत् यत्, कृत्रिम-कीटनाशकानां, उर्वरकानां, बीजानां च निर्माणे संलग्नानां कम्पनी-विशेषानां विरुद्धं कठोराचरणम् भविष्यति।
- डोनाल्ड ट्रम्पेन स्वसमकक्षं व्लोदिमीर ज़ेलेंस्की इत्यमुम् परामृष्टं यत् सः रूसदेशेन अधिकृतेषु केषुचित् क्षेत्रेषु स्वाधिकारं त्यजतु इति।

---

लोकसभा-अंतरिक्षयात्री

विपक्षस्य कोलाहलेन लोकसभा अद्य दिवसाय स्थिगितम्, अध्यक्षेण ओम बिरला वर्येण: अन्तरिक्ष यात्रिणं शुभांशु शुक्लं वर्धापितम् ।

सभायां विज्ञान-प्रौद्योगिकी-मन्त्री डा. जितेन्द्रसिंहः अद्य पञ्चत्रिंशोत्तर द्विसहस्रतमवर्षपर्यन्तं भारतीयान्तरिक्ष-केन्द्रस्य परिचालनस्य स्थापनार्थं, चत्वारिंशोत्तर द्विसहस्र तमवर्षपर्यन्तं च भारतीय-मानवयुत-अभियानं चन्द्रमसि प्रेषयितुं सर्वकारस्य प्रतिबद्धतां पुनः दृढीकृतवान्।

लोकसभायां अन्ताराष्ट्रिय-अन्तरिक्षस्थानके भारतस्य प्रथमस्य अन्तरिक्षयात्रिणः विषये विशेष-चर्चायाः समये श्रीसिङ्घ्-वर्यः अवदत् यत् एतानि लक्ष्याणि सप्तचत्वारिंशोत्तर द्विसहस्र तमवर्षस्य "विकासित्-भारत" इत्यस्य लक्ष्यात् पूर्वमेव प्राप्तानि भविष्यन्ति इति। सः आई. ए. एफ्. (IAF) इति समूहस्य कैप्टन शुभान्शु शुक्लस्य ऐतिहासिकस्य आई. एस्. एस्. अभियानस्य प्रशंसाम् अकरोत् तथा च प्रधानमन्त्रिण नरेन्द्रमोदिन: नेतृत्वे अन्तरिक्षक्षेत्रे जातानिविशष्ट परिवर्तनानि अधोरेखितवान्। श्रीसिंहः आपरेशन् सिन्दूर् इत्यस्य समये स्वदेशीय-अन्तरिक्ष-प्रौद्योगिकीनां उपयोगम् अपि उल्लिखत्, तथा च आर्थिकविकासे लोक-कल्याणे च अस्य क्षेत्रस्य भूमिकामपि अस्थापयत्। सः चर्चायाः समये विपक्षस्य विरोध प्रदर्शने दुःखं प्रकटितवान्, यत् ते वैज्ञानिकानां अन्तरिक्ष-विशेषज्ञानां च योगदानं स्वीकर्तुं विफलाः अभवन् इति।

-------------------------------------

संसद/भारतीय-पत्तन-विधेयकम्

अद्य संसदा भारतीय-पत्तन-विधेयकम् पञ्चविंशत्यधिक द्विसहस्रं राज्यसभायाः स्वीकरणानन्तरं पारितम्। अस्य विधेयकस्य उद्देश्यं राज्य-सागरीय-मण्डलानां शक्तीकरणं, सागरीय-राज्य-विकास-परिषदः स्थापना, सुरक्षां, प्रदूषणनियन्त्रणम्, विवाद-निराकरणं प्रमुख-पत्तनानां विनियमनस्य आधुनिकीकरणं चास्ति। पत्तन-मन्त्री सर्बानन्द सोनोवालः अवदत् यत् एतत् विधेयकं पत्तन-नियमान् एकीकृतं करिष्यति, एकीकृत-विकासं प्रवर्तयिष्यति, व्यापारे सुगमतां च वर्धयिष्यति इति।

-------------------------------------

राष्ट्रपतिः आदिवासी

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य नवदिल्ल्यां जनजातीयकार्यमन्त्रालयस्य 'आदिकर्मयोगी अभियानस्य' अन्तर्गतं विविधराज्यानां प्रतिनिधित्वं कुर्वतां जनजातीयजनसमूहेन सह मिलितवती। एकस्मिन् सोशल मीडिया संदेशे राष्ट्रपतिः मुर्मुः प्रोक्तवती यत् जनजातीय-समुदायानां अमूल्यज्ञानं, तेषां सांस्कृतिकपरम्परा:, तेषां जीवनशैल्य: च संरक्षितव्य: इति। राष्ट्रपतिः इतोऽपि आदिवासि-

समुदायानां समर्थनं याचितवती तथा च उक्तवती यत् ते समुचित-आदरेन सम्मानेन च देशस्य विकासयात्रायां सक्रिय-सहभागिनः भवितुम् अर्हन्ति इति।

---------------------------------------

शिवराज सिंह चौहान:

केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अवदत् यत्, कृत्रिम कीटनाशकानां, उर्वरकानां, बीजानां च निर्माणे संलग्नानां कम्पनी-विशेषानां विरुद्धं कठोराचरणम् भविष्यति इति। श्रीचौहानः विषाक्त-रसायनानां सिञ्चनेन सोयाबीन्-सस्यानां क्षतेः मूल्याङ्कनाय मध्यप्रदेशं गतवान्। केन्द्रीयकृषि-कृषक- कल्याण-मन्त्रिणा शिवराज सिंह चौहानेन कृत्रिम-विषाक्त-रसायनानां कारणात् सोयाबीन्-सस्यानां क्षतिः अभवत् इति आक्षेपः प्राप्तः आसीत्। तदनन्तरं, श्री. चौहानः, रायसेन्-विदिशा-जनपदयोः प्रभावितक्षेत्राणि गत्वा क्षतेः निरीक्षणं कृतवान्। सः अवदत् यत् एतादृशानां कम्पनी-विशेषानां विरुद्धं अभियानम् आरभ्यते इति।

श्री चौहानस्य निर्देशानुसारं कार्यं कुर्वन्, भारतीय-कृषि-अनुसन्धान-परिषदः तत्क्षणमेव अन्वेषण-समितेः निर्माणम् अकरोत्। समितिः अद्य क्षेत्राणां भ्रमणं कृत्वा सस्यानां क्षतेः परिमाणस्य मूल्याङ्कनं करोति।

---------------------------------------

एनडीए उपराष्ट्रपतिः :

आगामि-उपराष्ट्रपति-निर्वाचनार्थं महाराष्ट्रस्य राज्यपालः सी.पी. राधाकृष्णन-वर्यः राष्ट्रिय-लोकतांत्रिक-घटबन्धनस्य प्रत्याशी भविष्यति। भाजपा-दलस्य राष्ट्राध्यक्षः केन्द्रीयमन्त्री जे.पी.नड्डा गतसायं, नवदिल्लीनगरे, संसदीयमण्डलस्य उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् इमां घोषणां कृतवान्। एनडीए-घटबन्धनस्य उप-राष्ट्रपतिपदस्य प्रत्याशी, सी.पी.राधाकृष्णन इत्येष: अद्य नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनम् अकरोत्। सोशल मीडिया सन्देशे श्रीमोदिना प्रकाशितं, यत् दीर्घकालिक-सार्वजनिकजीवने राधाकृष्णन-वर्य: स्वस्य

समर्पणेन, विनयेन, बुद्ध्या च विशिष्टः अभवत्। प्रधानमन्त्रिणा अग्रे विश्वासः प्रकटितः यत् राधाकृष्णनमहोदयः प्रेरणादायकः उपराष्ट्रपतिः भविष्यति।

-------------------------------------

## ऋतु विभाग:

ऋतु विभागेन अद्य छत्तीसगढस्य, ओडिशा-राज्यस्य, तेलङ्गाना-राज्यस्य, तटीय-आन्ध्रप्रदेशस्य, महाराष्ट्रस्य च केषुचित् भागेषु अत्यधिकवृष्टेः रक्तवर्णीया सूचना प्रसारितास्ति। मुम्बै-नगरे प्रचण्डवृष्ट्या रेलयानानि विलम्बितानि, विमानयानानि च बाधितानि, विद्यालयाः स्थगिताः। ओडिशा-राज्यस्य मल्कानगिरि-मण्डले जलप्लावनं जातम्, येन मार्ग-सम्पर्कः विच्छिन्नः अभवत्। विशाखापत्तनम्, पूर्वगोदावरि इत्यादीनां उत्तरतटीय-आन्ध्रस्य मण्डलानां कृते अपि रक्त-संचेतना प्रसारितास्ति। अस्मिन् सप्ताहे सम्पूर्णे पूर्वोत्तर भारते, मध्यभारते, जम्मू-काश्मीरे च प्रचण्डवृष्टिः भविष्यति।

-------------------------------------

## ट्रंप-ज़ेलेंस्की वार्ता

अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन स्वकीयेन युक्रेनदेशस्य स्वसमकक्षं व्लोदिमीर ज़ेलेंस्की इत्यमुम् परामृष्टं यत् सः रूसदेशस्य अधिकृतेषु केषुचित् क्षेत्रेषु स्वाधिकारं त्यजतु इति। ज़ेलेन्स्की अद्य यूरोपीयनेतृणां समूहेन सह ओवलकार्यालये ट्रम्पेन सह मेलनं करिष्यति। ह्यः ट्रम्पेन ट्रुथ सोशल इत्यत्र एकस्मिन् सन्देशे उक्तं यत् राष्ट्रपतिः ज़ेलेंस्की रूसदेशेन सह युद्धं प्रायः तत्क्षणमेव समाप्तुं शक्नोति, यदि सः इच्छति, अथवा सः युद्धं निरन्तरं कर्तुं शक्नोति। ट्रम्पः चतुर्दशोत्तर-द्विसहस्रतमे वर्षे युक्रेनदेशस्य क्रीमियाद्वीपसमूहे रूसदेशेन तदा सैन्यप्रतिरोधं विनैव कृत अतिक्रमणस्य उल्लेखं कुर्वन् आसीत् यदा बराक ओबामा राष्ट्रपतिः आसीत्। युक्रेनदेशस्य विंशतिः प्रतिशत क्षेत्रेषु रूसदेशेन अतिक्रमणम् कृतम् अस्ति।

।। इति वार्ता ।।